श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ एकोनविंशत्यधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनविंशत्यधिकशततमः सर्गः ॥

## श्रीमहादेवस्याज्ञया श्रीरामलक्ष्मणाभ्यां विमानेनागतस्य राज्ञो दशरथस्याभिवादनं पुत्राभ्यां सीतायै चावश्यकं सन्दिश्य तस्येन्द्रलोके गमनं च

एतच्छ्रुत्वा शुभं वाक्यं राघवेणानुभाषितम्।
ततः शुभतरं वाक्यं व्याजहार महेश्वरः॥ **6.119.1** ॥

पुष्कराक्ष महाबाहो महावक्षः परन्तप।
दिष्ट्या कृतमिदं कर्म त्वया धर्मभृतां वर॥ **6.119.2** ॥

दिष्ट्या सर्वस्य लोकस्य प्रवृद्धं दारुणं तमः।
अपवृत्तं त्वया सङ्ख्ये राम रावणजं भयम्॥ **6.119.3** ॥

आश्वास्य भरतं दीनं कौसल्यां च यशस्विनीम्।
कैकेयीं च सुमित्रां च दृष्ट्वा लक्ष्मणमातरम्॥ **6.119.4** ॥

प्राप्य राज्यमयोध्यायां नन्दयित्वा सुहृज्जनम्।
इक्ष्वाकूणां कुले वंशं स्थापयित्वा महाबल॥ **6.119.5** ॥

इष्ट्वा तुरगमेधेन प्राप्य चानुत्तमं यशः।
ब्राह्मणेभ्यो धनं दत्त्वा त्रिदिवं गन्तुमर्हसि॥ **6.119.6** ॥

एष राजा दशरथो विमानस्थः पिता तव।
काकुत्स्थ मानुषे लोके गुरुस्तव महायशाः ॥ **6.119.7** ॥

इन्द्रलोकं गतः श्रीमांस्त्वया पुत्रेण तारितः।
लक्ष्मणेन सह भ्रात्रा त्वमेनमभिवादय ॥ **6.119.8** ॥

महादेववचः श्रुत्वा राघवः सहलक्ष्मणः।
विमानशिखरस्थस्य प्रणाममकरोत् पितुः ॥ **6.119.9** ॥

दीप्यमानं स्वया लक्ष्म्या विरजोऽम्बरधारिणम्।
लक्ष्मणेन सह भ्रात्रा ददर्श पितरं प्रभुः ॥ **6.119.10** ॥

हर्षेण महताऽऽविष्टो विमानस्थो महीपतिः।
प्राणैः प्रियतरं दृष्ट्वा पुत्रं दशरथस्तदा ॥ **6.119.11** ॥

आरोप्याङ्के महाबाहुर्वरासनगतः प्रभुः।
बाहुभ्यां सम्परिष्वज्य ततो वाक्यं समाददे ॥ **6.119.12** ॥

न मे स्वर्गो बहु मतः सम्मानश्च सुरर्षभैः।
त्वया राम विहीनस्य सत्यं प्रतिशृणोमि ते ॥ **6.119.13** ॥

अद्य त्वां निहतामित्रं दृष्ट्वा सम्पूर्णमानसम्।
निस्तीर्णवनवासं च प्रीतिरासीत् परा मम ॥ **6.119.14** ॥

कैकेय्या यानि चोक्तानि वाक्यानि वदतां वर।
तव प्रव्राजनार्थानि स्थितानि हृदये मम ॥ **6.119.15** ॥

त्वां तु दृष्ट्वा कुशलिनं परिष्वज्य सलक्ष्मणम्।
अद्य दुःखाद् विमुक्तोऽस्मि नीहारादिव भास्करः ॥ **6.119.16** ॥

तारितोऽहं त्वया पुत्र सुपुत्रेण महात्मना।
अष्टावक्रेण धर्मात्मा कहोलो ब्राह्मणो यथा ॥ **6.119.17** ॥

इदानीं च विजानामि यथा सौम्य सुरेश्वरैः।
वधार्थं रावणस्येह विहितं पुरुषोत्तमम्॥ **6.119.18**॥

सिद्धार्था खलु कौसल्या या त्वां राम गृहं गतम्।
वनान्निवृत्तं संहृष्टा द्रक्ष्यते शत्रुसूदनम्॥ **6.119.19**॥

सिद्धार्थाः खलु ते राम नरा ये त्वां पुरीं गतम्।
राज्ये चैवाभिषिक्तं च द्रक्ष्यन्ते वसुधाधिपम्॥ **6.119.20**॥

अनुरक्तेन बलिना शुचिना धर्मचारिणा।
इच्छेयं त्वामहं द्रष्टुं भरतेन समागतम्॥ **6.119.21**॥

चतुर्दश समाः सौम्य वने निर्यातितास्त्वया।
वसता सीतया सार्धं मत्प्रीत्या लक्ष्मणेन च॥ **6.119.22**॥

निवृत्तवनवासोऽसि प्रतिज्ञा पूरिता त्वया।
रावणं च रणे हत्वा देवताः परितोषिताः॥ **6.119.23**॥

कृतं कर्म यशः श्लाघ्यं प्राप्तं ते शत्रुसूदन।
भ्रातृभिः सह राज्यस्थो दीर्घमायुरवाप्नुहि॥ **6.119.24**॥

इति ब्रुवाणं राजानं रामः प्राञ्जलिरब्रवीत्।
कुरु प्रसादं धर्मज्ञ कैकेय्या भरतस्य च॥ **6.119.25**॥

सपुत्रां त्वां त्यजामीति यदुक्ता केकयी त्वया।
स शापः कैकयीं घोरः सपुत्रां न स्पृशेत् प्रभो॥ **6.119.26**॥

तथेति स महाराजो राममुक्त्वा कृताञ्जलिम्।
लक्ष्मणं च परिष्वज्य पुनर्वाक्यमुवाच ह॥ **6.119.27**॥

रामं शुश्रूषता भक्त्या वैदेह्या सह सीतया।
कृता मम महाप्रीतिः प्राप्तं धर्मफलं च ते॥ **6.119.28**॥

धर्मं प्राप्स्यसि धर्मज्ञ यशश्च विपुलं भुवि।
रामे प्रसन्ने स्वर्गं च महिमानं तथोत्तमम्॥ **6.119.29**॥

रामं शुश्रूष भद्रं ते सुमित्रानन्दवर्धन।
रामः सर्वस्य लोकस्य हितेष्वभिरतः सदा॥ **6.119.30**॥

एते सेन्द्रास्त्रयो लोकाः सिद्धाश्च परमर्षयः।
अभिवाद्य महात्मानमर्चन्ति पुरुषोत्तमम्॥ **6.119.31**॥

एतत् तदुक्तमव्यक्तमक्षरं ब्रह्मसम्मितम्।
देवानां हृदयं सौम्य गुह्यं रामः परन्तपः॥ **6.119.32**॥

अवाप्तधर्माचरणं यशश्च विपुलं त्वया।
एवं शुश्रूषताव्यग्रं वैदेह्या सह सीतया॥ **6.119.33**॥

इत्युक्त्वा लक्ष्मणं राजा स्नुषां बद्धाञ्जलिं स्थिताम्।
पुत्रीत्याभाष्य मधुरं शनैरेनामुवाच ह॥ **6.119.34**॥

कर्तव्यो न तु वैदेहि मन्युस्त्यागमिमं प्रति।
रामेणेदं विशुद्ध्यर्थं कृतं वै त्वद्धितैषिणा॥ **6.119.35**॥

सुदुष्करमिदं पुत्रि तव चारित्रलक्षणम्।
कृतं यत् तेऽन्यनारीणां यशो ह्यभिभविष्यति॥ **6.119.36**॥

न त्वं कामं समाधेया भर्तृशुश्रूषणं प्रति।
अवश्यं तु मया वाच्यमेष ते दैवतं परम्॥ **6.119.37**॥

इति प्रतिसमादिश्य पुत्रौ सीतां च राघवः।
इन्द्रलोकं विमानेन ययौ दशरथो नृपः॥ **6.119.38**॥

विमानमास्थाय महानुभावः
श्रिया च संहृष्टतनुर्नृपोत्तमः।

**आमन्त्र्य पुत्रौ सह सीतया च**
**जगाम देवप्रवरस्य लोकम् ॥ 6.119.39 ॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
एकोनविंशत्यधिकशततमः सर्गः ॥